Reg. No. : 600/2009-10 ISSN : 0975 – 7880

# MANAVIKI

An International Peer Reviewed and Refereed Research Journal of Humanities & Social Sciences

UGC List No-: 42515 IIJF Impact Factor-: 3.097

Vol. XII No. I January-June 2020

SOCIETY FOR EDUCATION & SOCIAL WELFARE • VARANASI •

**Chief Editor**
*Ravindra N. Singh*

**Editors**
*Vikas Kumar Singh*
*Amit Kumar Upadhyay*
*Niraj Kumar Mishra*

**Associate Editors**
*Ajit Kumar Choudhary*
*Amit Ranjan*

A REFEREED JOURNAL OF THE SOCIETY FOR EDUCATION & SOCIAL WELFARE, VARANASI – 221005 (INDIA)

37. लैंगिक भेदभाव के प्रति युवाओं का दृष्टिकोण (डी०ए०वी० पी०जी० कॉलेज,वाराणसी मे अध्ययनरत् छात्रो पर आधारित) 147-151
*नेहा चौधरी*

38. नाथ सम्प्रदाय का अभ्युदय एवं विकास 152-154
*डॉ0 उपमा पाण्डेय*

39. **Of Youth and Immortality: Revisiting William Hazlitt's "On the Feeling of Immortality in Youth"** 155-160
*Panchanan Dalai*

40. बौद्धकालीन कृषि एवं कृषि उत्पाद 161-164
*डॉ0 सुशील भारती*

41. कौटिल्य अर्थशास्त्र एवं मनुस्मृति में दास प्रथा का विवेचन 165-166
*सारिका सिंह*

42. **Covid-19 and India** 167-169
*Deepesh Kumar*

43. **Ekal Vidyalay Yojna and the Educational Transformation** 170-173
*Ankur Tiwari*

44. **再谈汉族学生学习吉尔吉斯语语音与字母的难点及对策** 174-179
*才甫丁·依沙克*

45. गाँधी एवं दर्शन 180-182
*राजीव कुमार सिंह*

46. काव्यमीमांसा, भारतीयसंस्कृतिश्च 183-185
*डॉ. किरण आर्या*

47. बक्सर 'जिला में जनसंख्या की व्यावसायिक संरचना : एक भौगोलिक विश्लेषण 186-191
*रंजन कुमार*

48. झारखण्ड में जनजातीय साक्षरता एक भौगोलिक अध्ययन 192-201
*निरुपमा सुरभि लकड़ा*

49. शुंग, कण्व व सातवाहन काल मे ब्राह्मणीय व्यवस्था का पुनर्दृढ़ीकरण और पुरोहित तंत्र की पुनर्स्थापना 202-203
*डा० जितेन्द्र कुमार सिंह*

50. परवर्ती गुप्तकालीन नगरों की स्थिति 204-208
*डॉ0 हेमन्त कुमार सिंह*

51. वैदिक काल में कृशि एवं उद्योग–धन्धों का विकास 209-211
*डॉ0 रंजेश कुमार*

52. मौर्योत्तर कालीन सांस्कृतिक परिदृश्य 212-215
*डॉ0 बिपिन कुमार दूबे*

53. भारत में फैलता लाल गलियार 216-219
*डॉ कलानंद मंडल*

54. **Estimation Abilities of Prospective Teachers with Respect to Qualification, Subject Stream and Caste** 220-233
*Avtar jit singh*
*Yogita Kamal*

55. प्राचीन शिक्षा का केन्द्र तक्षशिला 234-235
*डॉ. मनोज कुमार*

56. रहीम के काव्य में लोक जीवन 236-239
*डॉ0 अब्दुस सलाम*

57. सूफी काव्य में भारतीय कथानक 240-243
*डॉ0 वसीम राजा*

# काव्यमीमांसा, भारतीयसंस्कृतिश्च

*डॉ. किरण आर्या*
*सहा. प्रा. संस्कृत–विभागः, डॉ. हरिसिंहगौरविश्वविद्यालयः, सागरम्*

आचार्यमम्मटेन लिखितं काव्यप्रयोजनं – **काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतये। कान्तासम्मिततयोपदेशयुजे** इति भवति प्रायः सर्वेषां काव्यानां भवत्येव तेषु व्यवहारविदे इत्यत्र ध्यातव्यम्द्ध संस्कृतिर्हि कस्यापि जनसमुदायस्य आचायव्यवहारादीनां समष्टिरेव भवति। अत एव सुकविभिः यान्यपि काव्यानि, महाकाव्यानि, नाटकानि संरचितानि तत्र तेषामुद्देष्यः नैव स्ववैदुष्यप्रदर्षनम् अपितु तन्माध्यमेन सहृदयाणामध्येतृणां पाठकानां हृदि संस्कृतिसंयुतं व्यवहारसुदृढकरणम् भारतीयसंस्कृतेष्च संरक्षणं भवति।तामेव गौरवषलीपरपम्परामवगाहन् दषमषताब्द्यां एकः मूर्धन्यः विद्वान उदेति यं सकलवाङ्मये राजषेखरनाम्ना जानन्ति सर्वे।

श्रीराजषेखरदृष्ट्यापि काव्यसर्जना मानवानां व्यवहाराय एव। आचारविचाराः यदि पूताः भवन्ति तदेशा नियतिः यत् हृदये व्यवहारपक्षस्याविर्भावः भवति यष्च समाजोत्थानाय राष्ट्रोत्थानाय च पूर्णतया सहायको भवति। तमेव व्यवहारमनुसरन्ति जनाः, सा च व्यवहारात्मिका संस्कृतिः चैतन्यस्य भावं जागरयति। एतदेव कारणं राजषेखरेण सदा ध्यातं यत् मदीयेषु ग्रन्थेषु नाटकेषु भारतीया संस्कृतिः न कदाचित् विलुप्ता स्यादिति। श्री राजषेखरस्य नाटकानि पठित्वा एवंमनुभूयते यत् तत्कालीना संस्कृतिरिदानीं नवीना चेतनामंगीकुर्वन्ती अस्मत्समक्षं प्रस्तुताय उद्धृता अस्ति। कवयः जानन्ति स्म यत् महाकाव्यसर्जनं केवलं सुधीजनहितमेव स्यात् सामान्यजनमानसेभ्यः नैव बोधगम्यं भविता अत एव ते नाट्यपरम्परां दृष्यपरम्परां पोषितवन्तः, तस्माद्येऽपि जनाः पठनेऽसमर्थाः, श्रवणेऽसमर्थाः, तेऽपि दृष्यमाध्यमेन नाट्यमंचमाधृत्य तत् स्वीकुर्यरिति। तादृषेष्वपि जनेषु संस्कृतिः संस्कृतितत्त्वं तिष्ठेत् सांस्कृतिकविचारः परिफष्येत् इति मनसा विचार्य श्रीराजषेखरेणापि विद्धषालभंजिका, बालरामायण–बालभारतआदि नाटकानि रचितानि। अपि च काव्यमींमासादिसाहित्यिकग्रन्थानपि रचयामास।

अर्जुनं लक्ष्यीकृत्य यथा श्रीकृष्णेन उपदिष्टा गीता सकलमानवाय हितकारिणी विद्यते, तथैव राजषेखरेण काव्यमीमांसायां कविं लक्ष्यीकृत्य येऽपि संस्कृतिसंवाहकाः सदुपदेषाः प्रदत्तास्ते सर्वेभ्य एव जनेभ्यः धारणीयाः आचरणीयाष्च।

संस्कृतिर्हि जीवनपद्धतेः सर्वासां क्रियाणां व्यवहाराणां नियामिका पथप्रदर्षिका भवति अतः भारतीयसंस्कृतौ संस्काराणां महती भूमिका भवति तत्र राजषेखरस्य कथनम् –

**संस्कारो हि सर्वस्य गुणमुत्कर्षयति***1

अर्थात् संस्कारः सर्वेषु गुणेषु उत्कर्षतां करोति। अतः **अप्रवर्तितप्रदीपास्तमसि न पदार्थज्ञानम्** यथा विना प्रदीपाश्रयं अन्धकारे न पदार्थज्ञानं भवति तथैव विनैव संस्कृतिंनैव जीवनस्योपयोगित्वम्।

भाषात्वं नाम संस्कृतिसंवाहकत्वम्। कस्यामपि भाषायां तत्रत्या संस्कृतिः निहिता भवति, तयैव भाषया भाषितः षिक्षितः मानवः तत्रस्थया संस्कृत्या संस्कारितो भवति, अत्र सर्वभाषाविचक्षणः राजषेखरः भाषां प्रति स्वोदात्तभावनां प्रदर्षयति – **स्वतन्त्रस्य पुनरेकवत् सर्वा अपि भाषा स्युः। संस्कृतवत्सर्वास्वपि भाषास्वपि यथासामर्थ्यं यथारुचि यथाकौतुकं चावहितः स्यादिति।***2 **सदः संस्कारविशुद्धयर्थं सर्वभाषाकुशलः,***3 इत्याद्यनेकत्र स्थलेषु सर्वे स्वस्वभाषां प्रति श्रद्धधानाः स्युरिति कवि भावना दृष्यते।

तत्र 'आचार्यदेवो भव' इत्यस्माकं संस्कृतिः यतोहि आचार्य एव आचारं ग्राहयति अत सर्वप्रथमं आचार्य महनीयः। राजषेखर ब्रूते – **'अहरहःसुगुरुपासना प्रकृष्टो गुणः, सा हि बुद्धिविकासाय कामधेनुः'**अर्थात् गुरोपासना सर्वैर्विधातव्या यतोहि बुद्धि विकासाय सा कामधेनुरिव सर्वान् कामान् पूरयित्री विद्यते, तदाहुः–

**प्रथयति पुरः प्रज्ञाज्योतिर्यथार्थपरिग्रहे**
**तदनु जनयत्यूहापोहक्रियाविशदं मनः।**
**अभिनिविशते तस्मात्तत्वं तदेकमुखोदयं**
**सह परिचयो विद्यावृद्धैः क्रमादमृतायते।।***4

 आई.एस.एस.एन. : 0975–7880

विद्यावृद्धानां साहचर्य अमृत इव भवति। ष्यतोहि तत्त् यथार्थवस्तुतत्त्वग्रहणाय प्रज्ञाज्योति तनोति ततष्च ऊहापोहक्रियायै मनः समर्थयति अतः एव मनः निष्चततत्त्वमन्ततः प्राप्नोत्येव।

समन्वितं पारिवारिकजीवनमस्माकं वैदिकी संस्कृतिः । परिवारे कस्यापि सदस्यस्य महत्त्वं न कदापिउपेक्षितं भवितव्यम्– सहृदयं साम्मनस्यमविद्वेषं कृणोमि वः। सम्यंचं सव्रताः भूत्वा वाचं वदत भद्रया।सामाहमस्मि ऋक्त्वं द्यौरहं पृथिवी त्वम्, इत्यादिषु मन्त्रेषु फरुषस्त्रीणां समानता प्रदर्षिता विद्यते। तया संस्कृत्या अनुप्रेरितः राजषेखरः निगदति काव्यमीमांसायाम् –

**पुरुषवत् योषितोऽपि कवीभवेयुः। संस्कारो हि आत्मनि समवैति। न स्त्रैणं पौरुषं वा विभागमपेक्षते। श्रूयन्ते दृश्यन्ते च राजपुत्र्यो महामात्रदुहितरो गणिकाः कौतुकिभार्याश्च शास्त्रप्रहतबुद्धयः कवयः।***5 एषासमभावचेतना समाजेऽपि वर्तमाने वयं द्रष्टुं शक्नुमः फरुष इव नार्योऽपि कविकर्मणि कुषलाः सन्तीति। नैतावदेव नारीणां सम्मानमपि संस्कृतेर्वैषिष्ट्यम्। ' यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' भावनयानुप्राणितस्य राजषेखरस्य कृतौ काव्यमीमांसायां रसः न श्रृंगारभोगवेद्यामारोहते। वासनादृष्यं दृष्ट्वापि कवेः लेखनी उपासनायै प्रवृत्ता दृष्यते अतः काव्यमीमांसायां स्त्रीणां रूपं प्रषंसन्ति मुनयः –

**ताटङ्कवल्गनतरङ्गितगण्डलेख–**
**मानाभिलम्बिदरदोलिततारहारम्।**
**आश्रोणिगुल्फपरिमण्डलितोत्तरीयं**
**वेषं नमस्यत महोदयसुन्दरीणाम्।।***6

अस्मिन् पद्ये पूर्णश्रृंगारेण श्रृंगारितनायिकायाः सौन्दर्यवर्णनं भवति यस्यां मोहः मानवीयस्वभावः, किन्तु राजषेखरः सुन्दरीणां वेषं नमस्करणीयं मनुते न चोपभोगकरणीयम्। अत्र राजषेखरस्य नारीणां कृते सम्मानभावना परिलक्ष्यते।

आचारो हि भारतीयसंस्कृतेरपरा विषेषता। आचारहीनं न फनन्ति वेदाः। तत्र नित्यनैमित्तिककृत्यानुष्ठानमाचारः। आचारप्रभवो धर्मः, नित्याचारो हि प्रतिदिनसम्पाद्यकृत्यपरः। यस्मिन् विषये राजषेखरः कथयति–

**अनियतकाला प्रवृत्तयो विप्लवन्ते, तस्माद्दिवसं निशां च यामक्रमेण चतुर्द्धा विभजेत्। प्रातरुत्थाय कृतसन्ध्यावरिवस्यः। सारस्वतं सूक्तमधोयीत,** *7 इत्यादिकवीनां दिनचर्याव्याजेन मानवानां दिनचर्या आचारष्च नियम्यते। राजषेखरेण काव्यमीमांसायाम्।

शुचिष्च संस्कृतेर्वैषिष्ट्यम्। एषा हि न केवलं कायषुद्धावेव सन्तुष्यति अपितु मानसिकवाचिकषुचितामपि स्वविषयीकरोति। अस्मिन् विषये राजषेखरस्य कथनम् – **नित्यः शुचिः स्यात् । त्रिधा च शौचं वाक्शौचं, मनःशौचं, कायशौचं च। शुचिशीलनं हि सरस्वत्याः संवहनमानन्ति।***8 सरस्वत्याः वषीकरणे पवित्रचरित्रस्वभाव एव कारणमतः त्रिधा शौचमावष्यकम्।

अभिमानः श्रियं हन्ति अतः दूरादस्पर्षनं वरम्, अहंकारः इति संस्कारं पोषयन् राजषेखरः वक्ति – **न च दृप्येत दर्पलवोऽपि सर्वसंस्कारानुच्छिनत्ति।***9 राजषेखरस्येहाषयः यन्मनुजाः निरभिमानिनः स्युः यतोहि अभिमानः समूलनाषं नष्यति मनुजानाम्।

अद्यत्वे लोकादवादभयेन जनाः लोकेऽमाकं अन ुषंसा प्रषंसा भवेदिति कारणेन उचितमपि अनुचितं कुर्वन्ति। 'सत्यं वद, धर्मं चर' इति संस्कृतिमाश्रित्य कवान् निर्दिषति कविः –

**जनापवादमात्रेण न जुगुप्सेत चात्मनि।**
**जानीयात्स्वयमात्मानं यतो लोको निरंकुशः।।***10

अर्थात् कवयः निन्दाप्रषंसादिभ्यः पृथक् भूत्वा आचरेयुः यतोहि लोके उभयप्रवृत्तिरूपाः नराः भवन्ति। परिष्ठितयष्च परिवर्तिताः भवन्ति अतः कवीनां कर्तव्यं यत – सत्यमेव स्वलेखिन्या शाष्वतनीयम्, न च पक्षपातो विधातव्यः – **पक्षपातो हि गुणदोषौ विपर्यासयति।***11

एवंच महाकविराजषेखरमधीत्यएतत् सुस्पष्टं भवति यत् संस्कृतिं विना जीवनं रसहीनकाव्यमिव विद्यते तथा जीवने यदि संस्कृतेः प्रवाहो नास्ति तर्हि तज्जीवनं स्वसार्थकतां न साधयति। राजषेखरः स्वलेखिन्या दर्षितवान्, तन्नाटके स्यात्, दृष्यकाव्ये श्रव्यकाव्ये वा यत् – **के पोतयन्त्ररहिताः जलर्धा प्लवन्ते***10 अर्थात् विना नावं कस्समुद्रं तरति तथैव विना संस्कृतिं कः जीवनसागरं तरति। **मध्वपि नावदंशं स्वदते** *12यथा मधुरोऽपि पदार्थः जलं विना न रोचते तथैव संस्कारं विना जीवनं न शोभते। अतः राजषेखरा अद्यापि संस्कृतेरुन्नयनाय, सांस्कृतिकचेतनायै तावदेव प्रासंगिकाः यावच्च ते स्वकाले अभूवन्।

ISSN : 0975-7880 185

सन्दर्भसूची

1 काव्यमीमांसा अ.3
2 काव्यमीमांसा अ. 9
3 काव्यमीमांसा अ. 10
4 काव्यमीमांसा अ. 4
5 काव्यमीमांसा अ. 10
6 काव्यमीमांसा अ. 3
7 काव्यमीमांया अ. 10
8 काव्यमीमांसा अ. 10
9 काव्यमीमांसा अ. 10
10 काव्यमीमांसा अ. 10
11 काव्यमीमांसा अ. 10
12 काव्यमीमांसा अ. 10